# ॥ દુર્ગાસૂક્તં ॥

ૐ

જાતવેદસે સુનવામ સોમ મરાતીયતો નિદહાતિ વેદ: ।
સ ન: પર્ષદતિ દુર્ગાણિ વિશ્વા નાવેવ સિન્ધું દુરિતાઽત્યગ્નિ: ॥

તામગ્નિવર્ણાં તપસા જ્વલન્તીં વૈરોચનીં કર્મફલેષુ જુષ્ટામ ।
દુર્ગાં દેવીગં શરણમહં પ્રપદ્યે સુતરસિ તરસે નમ: ॥

અગ્ને ત્વં પારયા નવ્યો અસ્માન્થ્સ્વસ્તિભિરતિ દુર્ગાણિ વિશ્વા ।
પૂશ્ચ પૃથ્વી બહુળા ન ઉર્વી ભવા તોકાય તનયાય શંયો: ॥

વિશ્વાનિ નો દુર્ગહા જાતવેદ: સિન્ધુન્ન નાવા દુરિતાઽતિપર્ષિ ।
અગ્ને અત્રિવન્મનસા ગૃણાનોઽસ્માકં બોધ્યવિતા તનૂનામ ॥

પૃતના જિતગં સહમાનમુગ્રમગ્નિગં હુવેમ પરમાથ્સધસ્થાત ।
સ ન: પર્ષદતિ દુર્ગાણિ વિશ્વા ક્ષામદ્દેવો અતિ દુરિતાઽત્યગ્નિ: ॥

પ્રત્નોષિ કમીડ્યો અધ્વરેષુ સનાચ્ચ હોતા નવ્યશ્ચ સત્સિ ।
સ્વાઞ્ચાઽગ્ને તનુવં પિપ્રયસ્વાસ્મભ્યં ચ સૌભગમાયજસ્વ ॥

ગોભિર્જુષ્ટમયુજો નિષિક્તં તવેન્દ્ર વિષ્ણોરનુસંચરેમ ।
નાકસ્ય પૃષ્ઠમભિ સંવસાનો વૈષ્ણવીં લોક ઈહ માદયન્તામ ॥

ૐ કાત્યાયનાય વિદ્મહે કન્યકુમારિ ધીમહિ ।
તન્નો દુર્ગિ: પ્રચોદયાત ॥

ૐ શાન્તિ: શાન્તિ: શાન્તિ:

www.YouSigma.com